गोपीगीतम्

गोप्य उवाचः –

जयति तेऽधिकं जन्मनाव्रजः श्रयत इंदिरा साधु तत्र हि ।
दयित दृश्यतां त्वां दिदृक्षतां त्वयि धृतासवस्त्वां विचिन्वते ॥ १ ॥

व्रजजनार्तिहन् वीरयोषितां निजजनस्मयध्वम्सनस्मित ।
भजसखे भवे किंकरीः स्म नो जलरुहाननं चारु दर्शयन् ॥ २ ॥

शरुदुदाशये साधु जातसत्सरसिजोदर श्रीमुषा द्यशा ।
सुरतनाथ ते शुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ ३ ॥

विषजलाशयाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ।
वृषमयाद्भयाद्विश्वतोमुखाद्वृषभ ते वयं रक्षितामुहुः ॥ ४ ॥

स खलु गोपिकानंदनो भवानखिलदेहिनामंतरात्मदृक् ।
विखनसाऽर्चितो विश्वगुप्तये सख उदेयिवान् सात्वतान् कुले ॥ ५ ॥

विरचिताभयं वृष्णिवर्य ते शरणमीयुषां सम्सृतेर्भयात् ।
करसरोरुहं कांत कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ६ ॥

प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ।
फणिफणार्पितं ते पदांबुजं कृणुकुचेषु नः कृंधि हृच्छयम् ॥ ७ ॥

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीर मुह्यतीरधरसीधुनाऽऽप्याययस्व नः ॥ ८ ॥

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमंगलं श्रीमदाततं भुवि गृणंति ते भूरिदा जनाः ॥ ९ ॥
प्रहसितं प्रिय प्रेमवीक्षणं विहरणं च ते ध्यानमंगलम् ।
रहसि सम्विदो या हृदि स्पृशः कुहक नो मनः क्षोभयंति हि ॥ १० ॥

चलसि यद्व्रजाच्चारयन् पशून् नलिनसुंदरं नाथ ते पदम् ।
शिलतृणांकुरैः सीदसीति नः कलिलतां मनः कांत गच्छति ॥ ११ ॥

दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतम् ।
वनरजस्वलं दर्शयन् मुहुः मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥

प्रणतकामदं पद्मजार्चितं धरणिमंडलं ध्येयमापदि ।
चरणपंकजं शंतमं च ते रमण नस्तनेष्वर्पयाधिहन् ॥ १३ ॥

सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितम् ।
इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४ ॥

अटति यद्भवानह्नि काननं त्रुटियुगायते त्वामपश्यताम् ।
कुटिलकुंतलं श्रीमुखं च ते जडवदीक्षतां पक्ष्मनुद्दृशाम् ॥ १५ ॥

पतिसुतान्वयभ्रातृबांधवानतिविलंघ्य ते ह्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥

रहसि सम्वदं हृच्छयोदयं प्रहसिताननं प्रेमविक्षणम् ।
बृहदुरः श्रियो वीर वीक्ष्य ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥

व्रजवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगळम् ।
भज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥

श्री शुक उवाच –

इति गोप्यः प्रगायंत्यः प्रलपंत्यस्च चित्रधा ।
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ १९ ॥

तासामाविरभूच्छौरिः स्मयमानमुखांबुजः ।
पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २० ॥

इति श्रीमद्भागवते दशमस्कंदे गोपीगीतम्

भारतीरमणमुख्यप्राणांतर्गत श्री कृष्णार्पणमस्तु